अनुक्रमांकः ....................................
निरीक्षकस्य हस्ताक्षरम् ...........................

Paper Code
MV-105

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – दिसम्बरमासः – 2018**

**एम.ए. संस्कृत-व्याकरणम्, (सत्रम् : प्रथमसत्रम)**
**पंचमपत्रम् – संस्कृतसाहित्यम्**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' 'घ' इत्याख्येषु चतुषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

**खण्डः क**
**(गीता)**

**प्रश्न 1–** अधोलिखितेषु श्लोकेषु कयोश्चिद् द्वयोः श्लोकयोः पूर्तिः करणीया **(2.5×2=05)**

(क) अविभक्तं .................................................॥

(ख) ................................ सदसद्योनिजन्मसु॥

(ग) अध्यात्मज्ञान ...........................................॥

**प्रश्न 2–** अधोलिखितेषु श्लोकेषु पदविच्छेदान्वय-व्याकरणात्मटिप्पणीनिर्देशपूर्वकं कयोश्चिद् द्वयोः व्याख्या करणीया – **(05×02=10)**

(क) अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम्।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः॥

(ख) सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च॥

(ग) अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः॥

**खण्डः ख**
**(उपनिषद्)**

**प्रश्न 3–** अधःप्रदत्तेषु उपनिद्वाक्येषु कयोश्चिद् द्वयोः सप्रसङ्गं व्याख्या कार्या **(05×02=10)**

(क) स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दान् ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः।

(ख) सा होवाच मैत्रेय्यत्रैव मा भगवान् मोहान्तमापीपिपन्न वा अहमिमं विजानामीति स होवाच न वा अरेऽहं मोहं ब्रवीम्यविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मा।

(ग) स एष नेति नेत्यात्मागृह्यो न हि गृह्यतेऽशीर्यो न शीर्यतेऽसङ्गो न हि सज्यतेऽसिता न व्यथते न रिष्यति विज्ञातारमरे के विजानीयादित्युक्तानुशासनासि मैत्रेय्येतावदरे – खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यो विजहार।

**प्रश्न 4–** अधस्तनेषु कयोश्चिद्द्वयोः प्रश्नयोरुत्तरं स्वोपज्ञया प्रदेयम्। **(05×02=10)**

(क) आत्मनस्तु कामाय सर्वं प्रियं भवति" इत्यस्याशयः प्रस्फोरणीयः।

(ख) सवेषां वेदानां वागेकायनमिति याज्ञवल्क्यदिशा स्पष्टीकुरुत।

(ग) यनाहं नामृतास्यां किमहं तेन कुर्याम्? इत्यस्याभिप्रायं स्पष्टीकरुत।

## खण्डः ग
## (काव्यशास्त्रम्)

**प्रश्न 5–** अधोलिखितेषु केषाञ्चन त्रयाणामुत्तरं मम्मटदिशा लिखत। **(05×03=15)**

1. 'इति हेतुस्तदुद्भवे' इत्यस्याशयः सप्रमाणं प्रतिपादनीयः।
2. मम्मटसम्मतं काव्यलक्षणं सोदाहरणं लिखत।
3. को नाम ध्वनिः? इति मम्मटदिशा सोदाहरणं विमृशत।
4. किन्नाम गुणीभूतव्यङ्ग्यं काव्यमिति सोदाहरणं प्रतिपादयत।
5. स्वच्छन्दोच्छलदच्छकच्छकुहर ..................................
   इत्यादिपद्ये किन्नाम काव्यं निर्दिष्टम् आचार्यमम्मटेनेति यथायथं स्पष्टीकुरुत।

## खण्डः घ
## (काव्यम्ः)

**प्रश्न 6–** अधोलिखितेषु श्लोकेषु छन्दोऽलङ्कारान्वयव्याकरणादिटिप्पणीनिर्देशपूर्वकं कयोश्चिद् द्वयोः सप्रसङ्गं व्याख्या कार्या – **(05×03=15)**

(क) विरेजुहरिणा यत्र सुप्ता मेध्यासु वेदिषु।
सलाजैर्माधवीपुष्पैरुपहारा कृता इव॥

(ख) अस्मिन् धारापरिक्षिप्ते नेमिचिह्नितलक्षणे।
निर्मिमीध्वं पुरं यूयं मयि याते त्रिविष्टपम्॥

(ग) वसुमद्भिरविभ्रान्तैरलं विद्यरविस्मितैः।
यद्बभासे नरैः कीर्णं मन्दरः किन्नरैरिव॥

(घ) आपः पुरं तत्पुरुहूतकल्पा –
स्ते तेजसार्येण न विस्मयेन।
आपर्यशोगन्धमतश्च शश्वत्
सुता ययातेरिव कीर्तिमन्तः॥

**प्रश्न 7–** सौन्दरनन्दस्य प्रथमसर्गस्य सारांशः स्वशब्दैर्लेखनीयः। **(05)**

*अथवा*

अश्वघोषस्य काव्यसौन्दर्यं प्रतिपादयत।

---------------x---------------